- Title – अज्ञात
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 2|5 7-8 उपलब्ध
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning – ~~विवर्ज्यते~~ प्रविभूतिप्रभुक्तः ।15, सदाऽरक्तोऽग्नि सुरक्रियायां धातुक्रियायां.
- End – निजान्वये वैमनुजोनरेन्द्रस्तेन्द्रो ।
- Colophon-
- Illustrations -
- Source -
- Subject - ज्योतिष
- Revisor -
- Author -

1. Remarks- अपूर्ण, 1-6 अनुपलब्ध

Saman

प्रविभक्तियुक्तः १५ सद्यानुरक्तो नियुक्तक्रियायां धातुक्रियायामपि चोग्रसौम्यः यस्य प्रसूतौ च भवेद्विशाखा स रवानकस्या
पि भवेन्मनुष्यः १६ सत्कांतिकीर्तिश्च सदोत्सवः स्याज्जेतारिपूणां च कलाप्रवीणः स्वात्यं भवे यस्य किलान्नरा वा संप
द्विवाधा विविधा वतन्स्य १७ सत्कांतिकीर्तिर्हि मुनासमेतो चिन्ताचितोऽल्पं तनसन्तनापः श्रेष्ठप्रतिष्ठो वदतां वरिष्ठो ज्ये
ष्ठोद्भवः स्यान्नृषु को विशेषात् १८ अथ मूलविचारः मूलं विरुद्धावयवं समूलं कुलं निहन्त्येव वदंति संतः चेदन्यथा।
स्वकुरुते विशेषान्सौभाग्यमायुश्च कुलाभिवृद्धिं १९ ज्येष्ठान्त्यघटिकाचैकामूलादौ घटिकाद्वयं अभुक्तमूलमित्युक्तं
नत्रोत्पन्नश्च पोलेखं २० अष्ट वर्षाणि नो नालो कोनदेशाऽभ्रमिश्रिता तद्दोषपरिहारार्थं शांतिकं प्रोच्यतेऽधुना २१
रत्नैः शतौषधीमूलैः सप्तमृद्भिः प्रजयेत् शतच्छिद्रो घट स्तस्मान्निर्गते न जलेन हि २२ बालकं वापि तत्स्नाने विधेः
संपादिते सति जयहोमप्रदानेन कृते स्यान्मंगलं ध्रुवम् २३ विरुद्धावयवे मूले विधिरेवं समतो बुधैः मुनीनां वचनं
सत्यं मंतव्यं हि तमसो मुनिः २४ मूलस्य पाद त्रितये क्रमेण पितुर्जनन्याश्च धनस्य रिष्टं चतुर्थपादः शुभदो नितांतं सार्पे।
विलोमं परिकल्पनीयं २५ इति चरणफलं कुले तृतीयादशमी वलत् मूले तम हीजा किं बुधैः समेतः वेत्तुमका
ले किल तन्न मूलं मन्मूलनं तत्कुरुते कुलस्य २६ दिवासायं निशि प्रातः स्तान समानं स्वच पश्नूनं मित्रवर्गीस्य
क्रमान्मूलमनिष्टदम् इति मूलफलम् मूर्ध्नि पंच मुखे पंच स्कंधयो घटिकाष्टकं गजाभुजयोर्युग्मे हस्तयोर्हृदये
षकं २८ अग्मनाभौ दिशोत्तरं ष्ठे ष्ट जान्वोः षट्कपादयोः विन्यस्य पुरुषाकारे मूलस्य फलमादिशेत् २९ छत्रलाभः
शिरोदेशे वदने पितृघातनं स्कंधयोर्बलं च बाहुयुग्मे त्वकमेकृत ३० हस्तौ करः करद्वंद्वे राज्याप्तिर्हृदये भवे
त् जंघायोर्भ्रमणं प्रीतिर्नाभिपादयोर्जीवितात्यता ३१ घटीफलं मूलस्य मुनिपुंगवैः विज्ञेयं विबुधैः सर्वैः सर्पे तत्त्व

कल्पश्रोके

ईश्वरो विष्णुरंशुश्च पवनो मृत्युरस्तथा २

ज्यो॰ जा॰ भ॰ विवर्जयेत् ३३ इति पुंसां कृत्वाकुतौम नाम्नेमाफलम् । राक्षसो जातुधानश्च क्षेमः शक्रः फणीश्वरः पिता माता यमः
७ कालो विश्वेदेवा महेश्वरः सवीलश्च कुबेरश्च शक्रो मेघो दिवाकरः । गंधर्वी यमदेवश्च रुद्रा विष्णुर्यमोऽस्तथा ३४ षण्मुखो
भृंगरीटी च गौरीनाम्नी सरस्वती प्रजापतिश्च मूलस्य त्रिंशद्वै तत्र नायकाः ३५ विपरीतं पुनर्ज्ञेयास्त्रेषाजातवा
लके प्रथमे द्वितये षष्ठे चाष्टमे द्वादशे तथा त्रयोविंशे च नवमे कुलक्षयकरः शिशुः ३६ इति मुहूर्तफलं वेदाः स
प्त गजाः काष्ठा वेदा बाणाश्च षट्शिवाः मूलस्तंभत्वचाशाखापत्रं पुष्पं फलं शिखा ३७ मूलवृक्षविभागेषु मंगलं हि
फलेदले अमंगलफलं विद्यात् शेषभागेषु निश्चितं ३८ इति मूलवृक्षफलं पादे मुहूर्ते वेलायां वृक्षेषु प्रसूवा
कृतो अनियमस्तमाधिक्ये तमाधिक्ये शुभं फलम् ४० नानस्य जन्मभे यस्य प्रसूतिर्जायते यदि तातं वा भ्रातरं ज्ये
ष्ठं स्वं स कुरुते ध्रुवं ४१ मूलवच्छांतिकं तत्र विधेयं हि विचक्षणैः भूमिरत्नादि हेमान्नं देयं विप्रेषु भक्तितः ४२
सुखेन सुक्रोधनवाहनाढ्यः हिंसात्वताढ्यः स्थिरकर्मकर्ता प्रतापितारातिजनो मनुष्यो मूले कृती स्याज्जनने मनु
ष्यः ४३ मृदुस्वभावः सतापवानान्नरः कामभोक्ता च बहुविलासः सुशीलः मूले संपन्न जायते नरस्य गाढा पूर्वाषाढाजन्मनि ।
यस्य पुंसः ४४ दाता दयालुर्विजयी विनीतः सत्कर्मचेता विभुताभिमानः कांतासुताढ्यः सुखेन नितांतं वैश्वे सुवेषः
पुरुषो मनीषी ४५ अतिसुललितकांतिः संमतः सज्जनानां नरभवति विनीतश्चारुशीलः कीर्तिः सुरूपः द्विजवर
गुरुभक्तिः व्यक्तवाग्ज्ञानवान्स्यादभिजिति यदि सूतिर्नृपतिः सत्ववंशो ४६ शास्त्रानुरक्तो बहुपुत्रमित्रस्त्या
त्रभक्तिर्विजितारिपक्षः प्राणी पुराणश्रवणप्रवीणः श्रीजन्मकाले श्रवणो हि यस्य ४७ आचारजाता दरचार
शीलो धनाधिशाली बलवान्कृपालुः यस्य प्रसूतौ च भवेद्धनिष्ठा महत्प्रतिष्ठासहितो नरः स्यात् ४८ शीतभी
रुरतिसाहसी सदा निष्ठुरोतिचतुरो नरो भवेत् वैरिणामतिशयेन नाशयेद्वारुणोडु यदि यस्य संभवे ४९ जितो।

रामायनम
७

द्विय: सर्वेकलासु दक्षो जितारिपक्ष: स्वकुलस्य नित्यं भवेन्मनीषी सुतरां मपूर्वा पूर्वा यदा भाद्रपदा प्रसूतौ ५० कुलस्य मध्ये
क्लिन्नभूषणं वनानुरक्तो देवद्विजभक्तकर्मकर्त्ता यस्योत्तराभाद्रपदा च जन्मा धन्या लमेन्यां च भवेद्वदान्य: ५१ चारुशीलविभ
वोज्जितेन्द्रिय: सद्गुणानुभवनैकमानस: मानवो ननु भवेत्म हान तीरेवती भवति यस्य जन्मभम् ५२ अथ योगफलम्
ग: स्वत्वंकातानप्रनमित्रादिसौख्यं स्थानं त्र स्याल्लवकार्यप्रसंगे चंचद्वेहोन्मादने मानसे चेद्विष्कुंभो वै संभवेयस्य जन्मेतो: १
वक्ता रूपद्रूपसंपत्तियुक्तो दाता नानंतरसस्त्ववस्ताननक्ष जानानंद: सद्विनोदप्रसंग धर्मप्रीति: प्रीतिजन्मा मनुष्य: २
अर्थोत्यर्थं सावरंस्मितश्च नानास्थानो दानयानप्रवृत्ति: यस्यायुष्मान्संभवं संभवे स्यादायुष्मान्मानवो मा
नयुक्त: ३ ज्ञानी धनी सत्यपरायण: स्याद्दाचारशीलो बलवान्विवेकी सुसौभाग्यविराजमान: सौभाग्यजन्मा
हिमहाभिमानी ४ सत्वेनोतिचवनेर: सद्गुणाररस्याह गौरवयुक्त आसन्मति: नित्यशोभनविधानतत्पर: शोभनोभ
वति शोभनोद्भव: ५ सरोमदेहो गलरुक्क्रोधी विशालवक्त्रांघ्रिरतीवधूर्त: कलिप्रियो दीर्घहनुर्मनुष्य: यास्याऽक: सा
दतिगंडजात: ६ हृष्ट: सदा सर्वकलाप्रवीण: सत्साहसोत्साहसमन्वितश्च परोपकारी सुतरां सुकर्मा भवेत्सुकर्मा
परिसूतकाले ७ प्राज्ञो वदान्य: सततं प्रहृष्ट: श्रेष्ठ: सभायां चपल: सुशील: नयेन युक्तो विनयेन धन्या धन्याद्धृतेय
स्य नरस्य जन्म: ८ नरो दरिद्री मयसंयुतश्च सत्कर्मविद्याविनयातिरिक्त: यस्य प्रसूतौ यदि शूलयोगे शूलव्यथा
तस्य भवेत्कदाचित् ९ धूर्त: सुसत्कमपराङ्मुखश्च स्त्रैणी विशेषात्परदूषणस्वभाव: चेत्संभवे यस्य भवेच्च गंड: प्रचं
डकोप: पुरुष: प्रदिष्ट: १० सुसंग्रहप्रीतिरतीव दक्षो धनान्वित: स्यात्क्रयविक्रयाभ्यां प्रसूतिकाले यदि यस्य वृद्धि
र्भोग्याविवृद्धिर्नियमेन तस्य ११ निःशल्ताहिकमनाससदा लयेसंभवेच्च वदने सरस्वती चारुकीर्तिरपि दूरगा ध्रुवं

ओम. जा.
८

चेद्बुधो भवति यस्य जन्मभं १२ क्रूरोल्पदृष्टिः क्रियया विहीनो मलाहतः स्यादपवादवादी असत्यनाशी निरतीव मर्त्यो
व्याघातजातः खलु घातकर्त्ता १३ सुस्निग्धगात्रः कृतशास्त्रयत्नः सद्भूषणावसनादियुक्तः प्रसूतिकाले यदि हर्षणा
ख्ये स्मानवो वै खलु कर्षणः स्यात् १४ सुधीः सुवंशे गुणवान्महौजाः सत्यान्वितो रत्नपरीक्षकः स्यात् वेत्सं भवेद्यस्य
च जन्मयोगो स वज्रतुल्यो नरभूषणाढ्यः १५ उदारचेता अशु[न?]रः सुशीलः शास्त्रादरः सारविराजमानः प्रसूतिकाले
यदि यस्य सिद्धिर्भाग्याभिवृद्धिः सततं हितस्य १६ उदारमूर्त्तिः पितृमातृवाक्ये गदार्त्तमूर्त्तिश्च कठोरवाक्यः परस्य का
र्येषु निपातनः स्यान्नरः खलु स्याद्व्यतिपातजन्मा १७ उत्पन्नभोक्ता विनयोपपन्नो द्युत्यास्यता सद्यपतासमेतः सत्
कर्मसौजन्यतया वरीयान् भवेद्वरीयान् भवेदियस्य १८ असत्यसादी प्रतिभूतचेता हतात्मकर्मोद्यमया समेतः विहीनः
दलोल्पमतो विजेता विपक्षस्य व्याप्रियो वै परिघोद्भवः स्यात् १९ सन्मंत्रशास्त्राभिरतो नितांतं जितेंद्रियश्चारुश
रीरयष्टिः योगः शिवो यज्जन्मनि यस्य जंतोः सदाशिवं तस्य शिवप्रसादात् २० जितेंद्रियः सत्यपरोतिगौरः सर्वेषु
कार्येष्वपि कोविदश्च भवेन्नरस्तो यदि सिद्धयोगो सिद्धिंति कार्याणि कृतानि तस्य २१ नूनं विनीतश्च नरः सदा
सः स्वकार्यदक्षो जिनशास्त्रपतः सन्मंत्रविद्याविधिनैव सर्वं संसाधयेत्साध्यभवो मनुष्यः २२ शुभप्रचारः शु
भवाग्विलासः शुभस्य कर्त्ता शुभलक्षणश्च शुभोपदेशं कुरुते नराणां यस्य प्रसूतिः शुभनामयोगे २३ जि
तेंद्रियः सत्यवचा महौजाः वाग्वादिसंग्रामजयाश्रुपेतः सन्मार्ग्यशुक्लांबरधारणोऽयः शुक्लोद्भवो वै भवसंयुतः
स्यात् २४ विद्याभ्यासप्रीतिरत्यंततेजः नित्याचारः सत्सु जातादरश्च शांतो दांतो जायते चारुकर्मा ब्रह्मायोगे संभवे य
सपुंसः २५ प्राप्तोऽवलीयान् विपुलामलश्रीयः क्षोकपालाहि भवेन्महौजाः निजान्वयेवे मनुजो नरेंद्रस्त्वैंद्रो

रामः
८